# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – रामानुजवेदान्तः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – वेदार्थसङ्ग्रहः** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोरुपरि टिप्पणी लेख्या।**

१ दहराकाशगताः अन्वेष्टव्याः गुणाः।
२ यथासिद्धान्तं शेषशेषिलक्षणम्।
३ सर्वस्यापि ईश्वरशेषता।
४ लङ्गाद्यर्थम् विशदयत।

**प्रश्नः २** सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम्।
स संज्ञां पाति भगवान् एक एव जनार्दनः॥ इति त्रिमूर्तिसाम्यं प्रतीयतेऽत्र
सिद्धान्तं विवेचयत।

**प्रश्नः ३** परमात्मनः भोग्य-भोगोपकरण-भोगस्थानात्मकनित्यविभूतिमत्त्वम्।

**प्रश्नः ४** श्रीभगवतः फलप्रदत्वं संसाधयत।

**प्रश्नः ५** तद्विष्णोः परमं पदमिदं मन्त्रं यथाग्रन्थं विवेचयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोरूपरि टिप्पणी लेख्या।**

१ प्रकृतिपुरुषयोः परमात्मप्रकारता।
२ परमपदस्य त्रैविध्यम्।
३ लौकिकवैदिकशब्दैक्यम्।
४ वेदार्थसङ्ग्रहपरिचयः।

**प्रश्नः ७** नित्यविभूतिस्वरूपं यथाग्रन्थं विवेचयत।

**प्रश्नः ८** परमात्मनः कर्मफलप्रदातृतायाः श्रुतितः सिद्धिः कार्या ।

**प्रश्नः ९** सुखस्य ज्ञानरूपता ब्रह्मणः सुखरूपता चोपवर्णयत ।

**प्रश्नः १०** परस्य ब्रह्मणः सेवायाः परमपुरुषार्थत्वं यथाग्रन्थं निरूपयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ वेदार्थसङ्ग्रहस्य रचयिता कः ?

२ कश्च ध्येयः ? कारणं वान्यम् ?

३ कयोः भेदं वदन्तो दार्शनिका वेदबाह्याः ?

४ कारणावस्थास्थितः कः ?

५ मुक्तजीवानां प्राप्यं किम् ?

६ त्रिविधाः भावनाः काः ?

७ द्वेधा ज्ञानं किम् ?

८ तुष्यतुन्यायस्य स्वरूपं किम् ?

९ शेषी कः ? ईश्वरो जीवो वा ?

१० शेषः कः ?

११ जीवाः कतिविधाः ? के च ते ?

१२ कपिचलने धातोः व्युत्पन्नः कपिशब्दः इत्यस्य कोऽर्थः ?

१३ कर्मफलप्रदाता कः ?

१४ प्रलयस्यार्थः कः ?

१५ सर्वात्माशब्दस्य कोऽर्थः ?

****